# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा – २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री | प्रश्नपत्रम् – ६ | गुणाः – ५० |
| विषयः – नव्यव्याकरणम् | सत्रम् – ६ | समयः – १०:०० तः १२:०० |
| दिनाङ्कः – १९/०७/२०२१ | सन्दर्भग्रन्थः – परिभाषेन्दुशेखरः, व्याकरणमहाभाष्यं च | |

**सूचना -** **निम्नलिखितेषु दशसु प्रश्नेषु केचित् पञ्च प्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ कयोः अपि द्वयोः परिभाषयोः व्याख्या कार्या** १०

१ उपपदविभक्तेः कारकविभक्तिर्बलीयसी।

२ प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः।

३ अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी।

**प्रश्नः २ सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम् इति परिभाषा व्याख्येया।** १०

**प्रश्नः ३ लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् इति परिभाषा व्याख्येया।** १०

**प्रश्नः ४ कयोः अपि द्वयोः सूत्रयोः शङ्कासमाधानपूर्वकं भाष्यदिशा व्याख्या कार्या।** १०

१ ओत्

२ शे

३ निपात एकाजनाङ्

**प्रश्नः ५** ईदूदेद् द्विवचनं प्रगृह्यम् इति सूत्रं भाष्यदिशा व्याख्येयम्। १०

**प्रश्नः ६** अदसो मात् इति सूत्रं भाष्यदिशा व्याख्येयम्। १०

**प्रश्नः ७ कयोः अपि द्वयोः सूत्रयोः शङ्कासमाधानपूर्वकं भाष्यदिशा व्याख्या कार्या** १०

१ उञ उँ।

२ ईदूतौ च सप्तम्यर्थे।

३ तरप्तमपौ घः।

**प्रश्नः ८ दाधाघ्वदाप् इति सूत्रं भाष्यदिशा व्याख्येयम्। १०**

**प्रश्नः ९ आद्यन्तवदेकस्मिन् इति सूत्रं भाष्यदिशा व्याख्येयम्। १०**

**प्रश्नः १० केषामपि दशानां प्रश्नानाम् उत्तराणि लेख्यानि। १०**

१ अदसो मात् इति सूत्रं कां संज्ञां करोति?
२ प्रगृह्यसंज्ञायाः फलं किम्?
३ असत्त्वे चादीनां का संज्ञा वर्तते?
४ ईषदर्थे आ ङित् वर्तते न वा?
५ मर्यादार्थे आ ङित् वर्तते न वा?
६ ओदन्तस्य निपातस्य का संज्ञा भवति?
७ दाण्-धातोः का संज्ञा वर्तते?
८ डुधाञ्-धातोः का संज्ञा वर्तते?
९ धेट्-धातोः घुसंज्ञा वर्तते न वा?
१० दाप्-दैपोः घुसंज्ञा वर्तते न वा?
११ तरप्-तमपोः प्रत्यययोः का संज्ञा भवति?
१२ कृत्रिमाकृत्रिमयोः कस्मिन् कार्यसम्प्रत्ययः भवति?
१३ क्त-क्तवत्वोः प्रत्यययोः का संज्ञा भवति?
१४ अनिर्दिष्टार्थाः प्रत्ययाः कस्मिन् अर्थे ग्रहीतव्याः?
१५ कीदृशशब्दानां लाघवगौरवचर्चा नाद्रियते?

****